8 मनुष्यसिंहयोः मैत्री


I7I1M3











सौराष्ट्रप्रदेशे सताधारग्रामस्य समीपे मोटीमौणपरी नामकः ग्रामः वर्तते। कतिचित्वर्षपूर्वे तस्मिन् ग्रामे मात्रावालः नामकः एकः कृषीवलः आसीत्। नद्याः तटे कृषिवाटिका आसीत्। मात्रावालः प्रतिदिनं वाटिकायां वृक्षतले स्थित्वा नद्याः जलम् अपश्यत्।

एकदा सः अपश्यत् । सिंहः स्वभार्यया सह नद्याः जलपानार्थम् आगच्छत्। नद्याः जले स्थितः मकरः सिंहभार्यायाः वधम् अकरोत्। सिंहः तस्याः रक्षणाय प्रयत्नम् अकरोत्, किन्तु निष्फलः अभवत्। दुखितः सिंहः नद्याः तटे अतिष्ठत्। चतुर्णां दिनानाम् अनन्तरं यदा मकरः नद्याः तटसमीपं आगच्छत् तदा सिंहः शीघ्रतया आक्रमणम् अकरोत्। तयोः मध्ये घोरयुद्धम् अभवत्। सिंहः मकरस्य वधम् अकरोत्। किन्तु सः स्वयमपि क्षतिग्रस्तः भूत्वा तत्रैव अपतत्।

मात्रावालः दूरतः एतत् अपश्यत्। सः क्षतिग्रस्तसिंहस्य सहायतार्थं तत्र अगच्छत्। औषधानि आनीय सः सिंहस्य शुश्रूषाम् अकरोत्। कतिचित् दिनानन्तरं सिंहः स्वस्थः अभवत् तथा च तस्य मित्रम् अभवत्। तदनन्तरं सः एव सिंहः प्रतिदिनं मात्रावालस्य गृहे तस्य समीपं न्यवसत्। सः मात्रावालेन सह सर्वत्र भ्रमणम् अकरोत्। तस्य गृहं क्षेत्रं च अरक्षत्। मनुष्यसिंहयोः एषा अद्वितीया मैत्री कतिचित्वर्षपर्यन्तं प्राचलत्। मात्रावालस्य निधनकाले दुःखितः सिंहः श्मशानयात्रायाम् अपि अगच्छत्। श्मशानतः एव सः वनम् अगच्छत्। तदनन्तरं कोऽपि जनः तं सिंहं न अपश्यत्।

अद्यापि जनाः एतस्य सत्यप्रसङ्गस्य विस्मरणं कर्तुं न शक्नुवन्ति।

टिप्पणी

कतिचित्वर्ष કેટલાંક વર્ષ **कृषिवाटिका** ખેતરવાડી **स्थितः** રહેલો **सिंहभार्या** સિંહની પત્ની, સિંહણ **क्षतिग्रस्तः** ઈજાવાળો **भूत्वा** થઈને **अपतत्** પડ્યો **आनीय** લાવીને **शुश्रूषाम्** સેવા, સારવાર **निधनकाले** મરણ સમયે

स्वाध्यायः

1. નીચેના શબ્દોનું ઉચ્ચારણ સાથે અનુલેખન કરો :

सौराष्ट्रप्रदेशे, मात्रावालः, कृषिवाटिका, क्षतिग्रस्तः, शुश्रूषाम्, मनुष्यसिंहयोः, सत्यप्रसङ्गस्य, सहायतार्थम्

2. પાઠના આધારે નીચેના પ્રશ્નોના જવાબ સંસ્કૃતમાં આપો અને લખો :

(1) मात्रावालः ग्रामस्य नामः किम् ?

(2) नद्याः तटे कस्य कृषिवाटिका आसीत् ?

(3) एकदा सिंहः स्वभार्यया सह कुत्र आगच्छत् ?

(4) मकरः कस्य वधम् अकरोत् ?

(5) कः क्षतिग्रस्तस्य सिंहस्य शुश्रूषाम् अकरोत् ?

3. ઉદાહરણમાં બતાવ્યા પ્રમાણે ક્રિયાપદોનાં રૂપોમાં પરિવર્તન કરો પાઠમાં તેનો ઉપયોગ ક્યાં થયો છે તે શોધો :

ઉદાહરણ : दृश् – अपश्यत्

गम् (गच्छ्) – _____

पठ् – _____

भू – _____

पत् – _____

वद् – अवदत्

वस् – _____

रक्ष् – _____

चल् – _____

4. નીચે આપેલાં વિધાનોને વાર્તાના ક્રમમાં ગોઠવીને ફરીથી લખો :

(1) श्मशानतः एव सः वनम् अगच्छत्।

(2) सः क्षतिग्रस्तस्य सिंहस्य सहायतार्थं तत्र अगच्छत्।

(3) नद्याः तटे मात्रावालस्यः कृषिवाटिका आसीत्।

(4) मात्रावालेन सह सर्वत्र भ्रमणम् अकरोत्।

(5) दुःखितः सिंहः नद्याः तटे अतिष्ठत्।

5. ઉદાહરણ પ્રમાણે વાક્યમાં ફેરફાર કરો :

ઉદાહરણ : सिंहः स्वभार्यया सह नद्याः जलपानार्थं गच्छति।

सिंहः स्वभार्यया सह नद्याः जलपानार्थम् अगच्छत्।

(1) मकरः सिंहभार्यायाः वधं करोति।

(2) सिंहः निष्फलः भवति।

(3) सिंहः गृहं क्षेत्रं च रक्षति।

(4) मननः पोरबन्दरनगरे वसति।

(5) बालः चलचित्रं पश्यति।

6. નીચેની ખાલી જગ્યા પૂરો :

(1) कृषीवलः वृक्षतले स्थित्वा नद्याः जलम् अपश्यत्। (स्था)

(2) शिष्यः शालां _____ अभ्यासम् अकरोत्। (गम्)

(3) भक्तः कथां _____ भोजनम् अकरोत्। (श्रु)

(4) भिक्षुकाय भोजनं _____ सः अखादत्। (दा)

(5) श्यामः दुग्धं _____ शयनम् अकरोत्। (पा/पिब्)

(6) गृहकार्यं _____ क्रीडार्यम् अगच्छत्ष (कृ)

7. તમારા શિક્ષક વાર્તાનો જે પરિચ્છેદ બોલે તે તમે ધ્યાનથી સાંભળીને તમારી નોટબુકમાં લખો. તમારા શિક્ષક મિત્રને બતાવો અથવા પાઠ્યપુસ્તક સાથે રાખી જાતે તપાસો અને ભૂલો સુધારો.

8. તમારી નોટબુકમાં જંગલનું ચિત્ર દોરો અને રંગ પૂરો.

પ્રવૃત્તિ :

- આ વાર્તાનું મનમાં વાચન કરો.
- આવી જ મનુષ્ય-પ્રાણીની દોસ્તી વિશેની સત્યઘટના તમારા વિસ્તારમાં બની હોય તો તમારા શિક્ષકની મદદથી તેની સંસ્કૃતમાં રજૂઆત કરો. જેમ કે...
  - ગલૂડિયું - બાળકની દોસ્તી
  - ડોશીમા - બિલાડીની દોસ્તી
  - મમ્મી - ગાયની દોસ્તી
- પ્રાણી-મનુષ્યની પ્રેમની વાર્તા લાઈબ્રેરીમાં જઈને શોધીને લાવો અને પ્રાર્થના-કાર્યક્રમમાં રજૂ કરો.